# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा -आचार्यद्वितीयवर्षम् (SEM-3) | प्रश्नपत्रम् – २ (C.C.- 5.3.7. Old & New ) | गुणा: - ७० |
|---|---|---|
| विषय: - वेद: | | |
| दिनाङ्क: - ०५/१२/२०१८ | शुक्लयजुर्वेदसंहिता महीधरभाष्यम् | समय: -१०.०० त: ०१.०० |

**प्रथमान्विति:**

**प्रश्न: १ अधोलिखितयो: एका एव कण्डिकाऽधीतभाष्यमाश्रित्य व्याख्यायताम् -** **( ५ )**

*(१) पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता ।*
*वारेण शश्वता तना ।*

*(२) या व्याघ्रं विषूचिकोभौ वृकं च रक्षति ।*
*श्येनं पतत्रिणं सिꣳहꣳ सोमं पात्वꣳ हस: ॥*

**प्रश्न: २ अधोनिर्दिष्टयोरप्येक एव प्रश्नोऽस्ति साध्य: -** **( १० )**

*(क) माध्यन्दिनसंहिताया: एकोनविंशतितमाध्यायस्य विषयान् उपस्थापयत ।*

*(ख) माध्यन्दिनसंहिताया: एकोनविंशतितमाध्याये मन्त्रेष्वागतानां हविष: पदार्थवैविध्यमुपपादयत ।*

**द्वितीयान्विति:**

**प्रश्न: ३ अध: स्थितयो: एकस्या एव कण्डिकाया: अधीतभाष्यमाश्रित व्याख्या विधीयताम् ।** **( ५ )**

*(क) कोऽसि कतमोऽसि कस्मै त्वा काय त्वा । सुश्लोक सुमङ्गल सत्यराजन् ॥*

*(ख) जिह्वा मे भद्रं वाङ्महो मनो मन्यु: स्वराड् भाम: ।*
*मोदा: प्रमोदा अङ्गुलीरङ्गानि मित्रं मे सह: ॥*

**प्रश्न: ४ अध: स्थितयोरप्येक एव प्रश्न: समाधेय: -** **( १० )**

*(क) विंशतितमाध्याये विहितानां पापकर्मणां फलनाशाय सूचितोपापस्य विषये यथाज्ञानं लिखत । (माध्यन्दिनसंहिताभाष्यलोके)*

*(ख) माध्यन्दिन-संहिताया: विंशतितमाध्याये मन्त्रस्थदेवेषु कस्यचिद्देवस्य विषये यथाज्ञानं लिखत ।*

**तृतीयान्विति:**

**प्रश्न: ५ निम्नलिखितयो: एकस्यैव व्याख्याऽधीतभाष्यमाश्रित्य विधीयताम् ।** **( ५ )**

*(क) इमं मे वरुणश्रुधीहवमद्या च मृडय । त्वामवस्युराचके ॥*

*(ख) समिद्धो अग्निः समिधा सुसमिद्धो वरेण्यः। गायत्री छन्द इन्द्रियं त्र्यविर्गौर्वयो दधुः।*

**प्रश्नः ६ अधोनिर्दिष्टयोरप्येकस्यैवप्रश्नस्योत्तरं लिखत। (१०)**

*(क) माध्यन्दिनसंहितायामुपरि लिखितस्य महीधरभाष्यस्य वैशिष्ट्यमुपस्थापयत।*

*(ख) माध्यन्दिनसंहितायाः एकविंशतितमाध्यायस्य विषयसारांशः प्रतिपाद्यताम्।*

## चतुर्थान्वितिः

**प्रश्नः ७ अधस्तनयोः एकस्योत्तरं लिखत। (५)**

*(१) वेदस्य कियन्तो भवन्ति विकृतिपाठाः, किञ्च तेषाम् प्रयोजनम्।*

*(२) कियन्तो भवन्ति (वेदस्य) प्रकृतिपाठाः का च तेषां प्रक्रियेति निरूपयत।*

**प्रश्नः ८ निम्नस्थेषु द्वयोरेव पदपाठं रचयत। (१०)**

*(क) सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्। स भूमिंम्थ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम्॥*

*(ख) त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवत्पुनः।*

*ततो विष्वङ्व्यक्रामत्साशनानशने अभि॥*

*(ग) चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्चमुखादग्निरजायत॥*

**प्रश्नः ९ अधः सङ्केतितेषु दशप्रश्नान् एव साधयत - (१०)**

*(१) स्वादु-शब्दस्य कोऽर्थः ?*

*(२) तीव्राम् - इत्यस्य महीधरानुसारम् कः अर्थः ?*

*(३) "देवहितम्" इत्यस्य कोऽर्थः ?*

*(४) माध्यन्दिनसंहितायाः एकोनविंशतितमाध्याये कस्य यागस्य वर्णनमस्ति ?*

*(५) "पवतिर्जननार्थः" इति कस्य वचनमस्ति ?*

*(६) माध्यन्दिनसंहिताया उनविंशतितमाध्याये काऽस्ति कण्डिका-संख्या ?*

*(७) "नर्यः" - इत्यस्य कोऽर्थः ? (माध्यन्दिनसंहिताभाष्यानुसारम्)*

*(८) माध्यन्दिनसंहितागतमन्त्रे स्थितस्य "महिषा" इति शब्दस्य कोऽर्थो भवति ?*

*(९) "अग्निष्वात्ताः" के भवन्ति ?*

*(१०) "सूत्रामा" — कस्य विशेषणम् ?*

*(११) "भद्रम्" - इत्यस्य महीधरानुसारं कोऽर्थः ?*

*(१२) महीधरानुसारं यज्ञप्रसङ्गे "राजा" इत्यस्य कोऽर्थः ?*

*(१३) "तत्त्वायामि" - इत्यत्र "यामि" इत्यस्य कोऽर्थः भवति मन्त्र-भाष्यानुसारम् ?*

*(१४) "अध्वर्युः" — केन वेदेन सम्बद्धो भवति ?*

*(१५) माध्यन्दिनसंहिताया एकत्रिंशत्तमाध्याये कियत्यः कण्डिकाः सन्ति ?*

--oo--